# Pitrisuktam

# પિતૃસૂક્તમ્

## Document Information

Text title : pitRisUktam

File name : pitRisUktam.itx

Category : veda, svara, sUkta

Location : doc_veda

Source : https://sanskritdocuments.org/mirrors/rigveda/e-text.htm

Latest update : April 2, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# પિતૃસૂક્તમ્

ઋગ્વેદાન્તર્ગતમ્

ઉદીરતામવર ઉત્પરાસ ઉન્મધ્યમાઃ પિતરઃ સોમ્યાસઃ ।
અસું ય ઈયુરવૃકા ઋતજ્ઞાસ્તે નોઽવન્તુ પિતરો હવેષુ ॥ ૧૦.૦૧૫.૦૧
ઇદં પિતૃભ્યો નમો અસ્ત્વદ્ય યે પૂર્વાસો ય ઉપરાસ ઈયુઃ ।
યે પાર્થિવે રજસ્યા નિષત્તા યે વા નૂનં સુવૃજનાસુ વિક્ષુ ॥ ૧૦.૦૧૫.૦૨
આહં પિતૄન્સુવિદત્રાઁ અવિત્સિ નપાતં ચ વિક્રમણં ચ વિષ્ણોઃ ।
બર્હિષદો યે સ્વધયા સુતસ્ય ભજન્ત પિત્વસ્ત ઇહાગમિષ્ઠાઃ ॥ ૧૦.૦૧૫.૦૩
બર્હિષદઃ પિતર ઊત્ય૧ર્વાગિમા વો હવ્યા ચકૃમા જુષધ્વમ્ ।
ત આ ગતાવસા શંતમેનાથા નઃ શં યોરરપો દધાત ॥ ૧૦.૦૧૫.૦૪
ઉપહૂતાઃ પિતરઃ સોમ્યાસો બર્હિષ્યેષુ નિધિષુ પ્રિયેષુ ।
ત આ ગમન્તુ ત ઇહ શ્રુવન્ત્વધિ બ્રુવન્તુ તેઽવન્ત્વસ્માન્ ॥ ૧૦.૦૧૫.૦૫
આચ્યા જાનુ દક્ષિણતો નિષદ્યેમં યજ્ઞમભિ ગૃણીત વિશ્વે ।
મા હિંસિષ્ટ પિતરઃ કેન ચિન્નો યદ્વ આગઃ પુરુષતા કરામ ॥ ૧૦.૦૧૫.૦૬
આસીનાસો અરુણીનામુપસ્થે રયિં ધત્ત દાશુષે મર્ત્યાય ।
પુત્રેભ્યઃ પિતરસ્તસ્ય વસ્વઃ પ્ર યચ્છત ત ઇહોર્જં દધાત ॥ ૧૦.૦૧૫.૦૭
યે નઃ પૂર્વે પિતરઃ સોમ્યાસોઽનૂહિરે સોમપીથં વસિષ્ઠાઃ ।
તેભિર્યમઃ સંરરાણો હવીંષ્યુશન્નુશદ્ભિઃ પ્રતિકામમત્તુ ॥ ૧૦.૦૧૫.૦૮
યે તાતૃષુર્દેવત્રા જેહમાના હોત્રાવિદઃ સ્તોમતષ્ટાસો અર્કૈઃ ।
આગ્ને યાહિ સુવિદત્રેભિરર્વાઙ્સત્યૈઃ કવ્યૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ ॥ ૧૦.૦૧૫.૦૯
યે સત્યાસો હવિરદો હવિષ્પા ઇન્દ્રેણ દેવૈઃ સરથં દધાનાઃ ।
આગ્ને યાહિ સહસ્રં દેવવન્દૈઃ પરૈઃ પૂર્વૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ ॥ ૧૦.૦૧૫.૧૦
અગ્નિષ્વાત્તાઃ પિતર એહ ગચ્છત સદઃસદઃ સદત સુપ્રણીતયઃ ।

અત્તા હવીંષિ  પ્રયતાનિ બર્હિષ્યથા  રયિં સર્વવીરં દધાતન ॥ ૧૦.૦૧૫.૧૧

ત્વમગ્ન ઈળિતો જાતવેદોઽવાડ્ઢવ્યાનિ  સુરભીણિ  કૃત્વી ।

પ્રાદાઃ  પિતૃભ્યઃ  સ્વધયા  તે અક્ષન્નદ્ધિ ત્વં દેવ  પ્રયતા હવીંષિ  ॥ ૧૦.૦૧૫.૧૨

યે ચેહ પિતરો  યે ચ  નેહ યાઁશ્ચ  વિદ્મ યાઁ ઉ  ચ  ન પ્રવિદ્મ ।

ત્વં વેત્થ  યતિ  તે જાતવેદઃ સ્વધાભિર્યજ્ઞં સુકૃતં જુષસ્વ ॥ ૧૦.૦૧૫.૧૩

યે અગ્નિદગ્ધા યે અનગ્નિદગ્ધા  મધ્યે  દિવઃ સ્વધયા  માદયન્તે ।

તેભિઃ  સ્વરાળસુનીતિમેતાં યથાવશં તન્વં  કલ્પયસ્વ ॥ ૧૦.૦૧૫.૧૪

---

## પિતૃસૂક્તં સ્વરરહિતમ્

ઉદીરતામવર ઉત્પરાસ ઉન્મધ્યમાઃ પિતરઃ સોમ્યાસઃ ।

અસું ય ઈયુરવૃકા ઋતજ્ઞાસ્તે નોઽવન્તુ પિતરો હવેષુ ॥ ૧૦.૦૧૫.૦૧

ઇદં પિતૃભ્યો નમો અસ્ત્વદ્ય યે પૂર્વાસો ય ઉપરાસ ઈયુઃ ।

યે પાર્થિવે રજસ્યા નિષત્તા યે વા નૂનં સુવૃજનાસુ વિક્ષુ ॥ ૧૦.૦૧૫.૦૨

આહં પિતૄન્સુવિદત્રાઁ અવિત્સિ નપાતં ચ વિક્રમણં ચ વિષ્ણોઃ ।

બર્હિષદો યે સ્વધયા સુતસ્ય ભજન્ત પિત્વસ્ત ઇહાગમિષ્ઠાઃ ॥ ૧૦.૦૧૫.૦૩

બર્હિષદઃ પિતર ઊત્યર્વાગિમા વો હવ્યા ચકૃમા જુષધ્વમ્ ।

ત આ ગતાવસા શંતમેનાથા નઃ શં યોરરપો દધાત ॥ ૧૦.૦૧૫.૦૪

ઉપહૂતાઃ પિતરઃ સોમ્યાસો બર્હિષ્યેષુ નિધિષુ પ્રિયેષુ ।

ત આ ગમન્તુ ત ઇહ શ્રુવન્ત્વધિ બ્રુવન્તુ તેઽવન્ત્વસ્માન્ ॥ ૧૦.૦૧૫.૦૫

આચ્યા જાનુ દક્ષિણતો નિષદ્યેમં યજ્ઞમભિ ગૃણીત વિશ્વે ।

મા હિંસિષ્ટ પિતરઃ કેન ચિન્નો યદ્વ આગઃ પુરુષતા કરામ ॥ ૧૦.૦૧૫.૦૬

આસીનાસો અરુણીનામુપસ્થે રયિં ધત્ત દાશુષે મર્ત્યાય ।

પુત્રેભ્યઃ પિતરસ્તસ્ય વસ્વઃ પ્ર યચ્છત ત ઇહોર્જં દધાત ॥ ૧૦.૦૧૫.૦૭

યે નઃ પૂર્વે પિતરઃ સોમ્યાસોઽનૂહિરે સોમપીથં વસિષ્ઠાઃ ।

તેભિર્યમઃ સંરરાણો હવીંષ્યુશન્નુશદ્ભિઃ પ્રતિકામમત્તુ ॥ ૧૦.૦૧૫.૦૮

યે તાતૃષુર્દેવત્રા જેહમાના હોત્રાવિદઃ સ્તોમતષ્ટાસો અર્કૈઃ ।

આગ્ને યાહિ સુવિદત્રેભિરર્વાઙ્સત્યૈઃ કવ્યૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ ॥ ૧૦.૦૧૫.૦૯

યે સત્યાસો હવિરદો હવિષ્પા ઇન્દ્રેણ દેવૈઃ સરથં દધાનાઃ ।

આગ્ને યાહિ સહસ્રં દેવવન્દૈઃ પરૈઃ પૂર્વૈઃ પિતૃભિર્ઘર્મસદ્ભિઃ ॥ ૧૦.૦૧૫.૧૦

અગ્નિષ્વાત્તાઃ પિતર એહ ગચ્છત સદઃસદઃ સદત સુપ્રણીતયઃ ।

અત્તા હવીંષિ પ્રયતાનિ બર્હિષ્યથા રયિં સર્વવીરં દધાતન ॥ ૧૦.૦૧૫.૧૧
ત્વમગ્ન ઈળિતો જાતવેદોऽવાડ્ઢવ્યાનિ સુરભીણિ કૃત્વી ।
પ્રાદાઃ પિતૃભ્યઃ સ્વધયા તે અક્ષન્નદ્ધિ ત્વં દેવ પ્રયતા હવીંષિ ॥ ૧૦.૦૧૫.૧૨
યે ચેહ પિતરો યે ચ નેહ યાઁશ્ચ વિદ્મ યાઁ ઉ ચ ન પ્રવિદ્મ ।
ત્વં વેત્થ યતિ તે જાતવેદઃ સ્વધાભિર્યજ્ઞં સુકૃતં જુષસ્વ ॥ ૧૦.૦૧૫.૧૩
યે અગ્નિદગ્ધા યે અનગ્નિદગ્ધા મધ્યે દિવઃ સ્વધયા માદયન્તે ।
તેભિઃ સ્વરાળસુનીતિમેતાં યથાવશં તન્વં કલ્પયસ્વ ॥ ૧૦.૦૧૫.૧૪

maNDala 10 sUkta 15

*Pitrisuktam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*